( वेदा वदने यस्येति विग्रहे ब्रह्मणि, पुं । यथा, देवीभागवते । ७ । ३० । ८१ ।
"गायत्री वेदवदने पार्व्वती शिवसन्निधौ ॥")

वेदवासः, पुं, (वेदानां वासो यस्मिन् ।) ब्राह्मणः । इति शब्दरत्नावली ॥

वेदवित्, [ द् ] पुं, ( वेदान् वेत्तीति । विद् + क्विप् । ) विष्णुः । यथा,—
"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥"
इति तस्य सहस्रनामस्तोत्रम् ॥
वेदज्ञे, त्रि । ( यथा, मनुः । २ । ७८ ।
"एतदक्षरमेताञ्च जपन् व्याहृतिपूर्व्विकाम् ।
सन्ध्ययोर्व्वेदविद्विप्रो वेदपुण्येन युज्यते ॥")

वेदव्यासः, पुं, ( वेदं व्यस्यति पृथक् करोतीति । वि + अस + अण् । निरुक्तिस्तु परत्र द्रष्टव्या ।) मुनिविशेषः । तत्पर्य्यायः । माठरः २ द्वैपायनः ३ पाराशर्य्यः ४ कानीनः ५ वादरायणः ६ व्यासः ७ । इति हेमचन्द्रः ॥ कृष्णद्वैपायनः ८ सत्यभारतः ९ पाराशरिः १० सात्यवतः ११ । इति त्रिकाण्डशेषः ॥ वादरायणिः १२ सत्यवतीसुतः १३ सत्यरतः १४ पाराशरः १५ । इति शब्दरत्नावली ॥ ( यथा, विष्णुपुराणे ।
"वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः ।
करोति बहुलं भूयो वेदव्यासस्वरूपधृक् ।
द्वापरे तु युगे विष्णुर्व्यासरूपी महामुने ।
वेदमेकं स बहुधा कुरुते जगतो हितः ॥
यथा च कुरुते तत्त्वा वेदमेकं पृथक् प्रभुः ।
वेदव्यासाभिधाना तु सा सा मूर्त्तिर्मधुद्विषः ॥")
अस्यान्यत् विवरणं व्यासशब्दे द्रष्टव्यम् ॥

वेदाग्रणीः, स्त्री, ( वेदानामग्रणीः ।) सरस्वती । इति राजनिर्घण्टः ॥

वेदाङ्गं, क्ली, ( वेदस्य अङ्गम् । ) श्रुत्यवयवषट्-प्रकारशास्त्रम् । तद्यथा । शिक्षा १ कल्पः २ व्याकरणम् ३ निरुक्तम् ४ ज्योतिषम् ५ छन्दः ६ । यदुक्तम् ।
"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः ।
छन्दोविचितिरित्येतैः षड़ङ्गो वेद उच्यते ॥" इति ॥
तत्र अकारादिवर्णानां स्थूलकरणप्रयत्नबोधिका अकु ए ह विसर्ज्जनीयाः कण्ठ्या इत्यादिका शिक्षा । यागक्रियाणामुपदेशः कल्पः । साधुशब्दान्वाख्यानं व्याकरणम् । वर्णागमो वर्णविपर्य्ययश्च इत्यादिना निश्चयेनोक्तं निरुक्तम् । ग्रहणादिगणनशास्त्रं ज्योतिः । श्रुतिच्छन्दसां प्रत्यायकं शास्त्रं छन्दोविचितिः । इत्यमरभरतौ ॥ ( यथा, मनुः । ४ । ९८ ।
"वेदाङ्गानि च सर्व्वाणि कृष्णपक्षेषु सम्पठेत् ॥")

वेदादि, क्ली, (वेदानामादि । "कचिदौपचारिकाः शब्दाः स्वलिङ्गमपि त्यजन्तीति" न्यायादस्य क्लीवत्वम् । ) प्रणवम् । यथा,—
"वेदादि भुवनेशीञ्च श्रीबीजं ङयुतं भृगुम् ।
कारयित्वा वदेन्मन्त्रं शुक्रस्य च षड़क्षरम् ॥"
इति रुद्रयामलम् ॥
( वेदस्य पूर्व्वं, पुं । यथा, तैत्तिरीयारण्यके ।
"यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ॥")

वेदादिबीजं, क्ली, ( वेदस्यादौ प्रयुक्तं बीजम् । ) प्रणवम् । यथा,—
"वेदादि भुवनेशीञ्च श्रीबीजं ङयुतं भृगुम् ।
कारयित्वा वदेन्मन्त्रं शुक्रस्य च षड़क्षरम् ॥
ॐ ह्रीँ श्रीशुक्राय । इति रुद्रयामलम् ॥
"वेदादिबीजं ह्रूँ बीजं स्त्रीबीजं तन्निकेतनम् ।
शक्तिबीजं रमाबीजं मायाबीजं सुखाकरम् ॥"
इति राजराजेश्वरीतन्त्रम् ॥

वेदाधिपः, पुं, ( वेदानामधिपः । ) चतुर्व्वेदाधिपतिग्रहः । यथा,—
"ऋग्वेदाधिपतिर्जीवो यजुर्व्वेदाधिपः सितः ।
सामवेदाधिपो भौमः शशिजोऽथर्व्ववेदराट् ॥"
इति ज्योतिस्तत्त्वम् ॥

वेदान्तः, पुं, ( वेदानां अन्तः । ) उपनिषत् । इति हेमचन्द्रः । वेदव्यासप्रणीतदर्शनशास्त्रविशेषोऽपि । यथा । वेदान्तो नाम उपनिषत्-प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च । इति परमहंसपरिव्राजकाचार्य्यश्रीसदानन्दयोगीन्द्रविरचितवेदान्तसारः ॥ * ॥ "इदानीं सर्व्वस्यापि वस्तुविचारोद्देशपूर्व्वकत्वात् प्रतिज्ञातं वेदान्तं नामतो निर्दिशति वेदान्त इति । उपनिषद एव प्रमाणं उपनिषत्-प्रमाणम् । उपनिषदो यत्र प्रमाणमिति वा । तदुपकारीणि वेदान्तवाक्यसंग्राहकाणि शारीरकसूत्रादीनि च । शरीरमेव शारीरं तत्र भवो जीवः शारीरकः सूत्र्यते याथातथ्येन निरूप्यते यैः तानि शारीरकसूत्राणि 'अथातो ब्रह्मजिज्ञासा' इत्यादीनि । आदिशब्दो भाष्यादिसंग्रहार्थः । चशब्दो वेदान्तशब्दानुषङ्गार्थः । यद्वा शारीरकसूत्राणि तद्यथार्थवादिवेदान्तार्थसंग्रहवाक्यानि । 'अथातो ब्रह्मजिज्ञासा' इत्यादिसूत्रादीनि । आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यन्ते । तेषामपि उपनिषच्छब्दवाच्यत्वादिति भावः ।" इति श्रीनृसिंहसरस्वतीकृता तट्टीका सुबोधनी ॥ अस्य नामान्तरं उत्तरमीमांसा । तत्र चत्वारः अध्यायाः । तेषु ब्रह्मनिरूपणम् । तद्विवरणं यथा,—
"अव्यक्तादण्डमभूदण्डाद्ब्रह्मा ततः प्रजासर्गः ।
मायामयी प्रवृत्तिः संह्रियते पुनः पुनः क्रमशः ॥
मायामयोऽप्यचेता गुणकरणगणः करोति कर्म्माणि ।
तदधिष्ठाता देही सचेतनोऽपि न करोति किञ्चिदपि ॥
यद्वदचेतनमपि सन्निकटस्थे भ्रामके भ्रमति लौहम् ।
तद्वत् करणसमूहश्चेष्टति चिदधिष्ठिते देहे ॥
यद्वत् सवितर्य्युदिते करोति कर्म्माणि जीवलोकोऽयम् ।
न च तानि करोति रविर्न कारयति तद्वदात्मापि ॥
मनसोऽहंकारविमूर्च्छितस्य चैतन्यबोधिस्येह ।
पुरुषाभिमानसुखदुःखभावना भवति मूढ़स्य ॥
कर्त्ता भोक्ता द्रष्टास्मि कर्म्मणामुत्तमादीनाम् ।
इति तत्स्वभावविमलोऽभिमन्यते सर्व्वगोप्यात्मा ॥
नानाविधवर्णानां वर्णान् धत्ते यथामलस्फटिकः ।
तद्वदुपाधेर्गुणभावितस्य भावं विभुर्धत्ते ॥
गच्छति गच्छति सलिले दिनकरविम्बं स्थिते स्थितिं याति ।
अन्तःकरणे गच्छति गच्छत्यात्मापि तद्वदिह ॥
राहुरदृश्योऽपि यथा शशिविम्बस्थः प्रकाशते जगति ।
सर्व्वगतोऽपि तथात्मा बुद्धिस्थो दृश्यतामेति ॥
आदर्शे मलरहिते यद्वद्रूपं विचिनुते लोकः ।
आलोकयति तथात्मा विशुद्धबुद्धौ स्वमात्मानम् ॥
सर्व्वगतं तत निरुपममद्वैतं तच्च चेतसा गम्यम् ।
यद्बुद्धिगतं ब्रह्मोपलभ्यते शिष्यबोध्यं तत् ॥
बुद्धिमनोऽहंकारास्तन्मात्रेन्द्रियगणाः सभूतगणाः ।
संसारसर्गपरिरक्षणक्षमाः प्राकृता ज्ञेयाः ॥
धर्म्माधर्म्मौ सुखदुःखकल्पना स्वर्गनरकवासश्च ।
उत्पत्तिनिधनवर्णाश्रमा न सन्तीह परमार्थे ॥
मृगतृष्णायामुदकं शुक्तौ रजतं भुजङ्गमो रज्ज्वाम् ।
तैमिरिकचन्द्रयुगवत भ्रान्तं निखिलं जगद्रूपम् ॥
यद्वद्दिनकर एको विभाति सलिलाशयेषु सर्व्वेषु ।
तद्वत् सकलोपाधिष्ववस्थितो भाति परमात्मा ॥
खमिव घटादिष्वन्तर्ब्बहिःस्थितं ब्रह्म सर्व्वपिण्डेषु ।
देहोऽहमित्यनात्मनि बुद्धिः संसारबन्धाय ॥
सर्व्वविकल्पनहीनः शुद्धोऽबुद्धोऽजरोऽमरः शान्तः ।
अमलः सकृद्विभातश्चेतन आत्मा खवद्व्यापी ॥
रसफाणितशर्करिका गुड़खण्डा विकृतयो यथैवेक्षोः ।
तद्वदवस्थाभेदाः परमात्मन्येव बहुरूपाः ॥
विज्ञानान्तर्यामिप्राणविराट्देहजातिपिण्डान्ताः ।
व्यवहारस्यस्यात्मन एतेऽवस्थाविशेषाः स्युः ॥
रज्ज्वां नास्ति भुजङ्गः सर्पभयं भवति हेतुना केन ।
तद्वद्द्वैतविकल्पभ्रान्तिरविद्या न सत्यमिदम् ॥
एतत्तदन्धकारं यदनात्मन्यात्मताभ्रान्त्या ।
न विदन्ति वासुदेवं सर्व्वात्मानं नरा मूढ़ाः ॥
प्राणाद्यन्तर्भेदैरात्मानं संवितत्य जालमिव ।
संहरति वासुदेवः स्वविभूत्या क्रीड़मान इव ॥
त्रिभिरेव विश्वतैजसप्राज्ञैस्तैरादिमध्यनिधनाख्यैः ।
जाग्रत्स्वप्नसुषुप्तैर्भ्रमभूतैश्छादितं तुर्य्यम् ॥
मोहयतीवात्मानं स्वमायया द्वैतरूपया देवः ।
उपलभते स्वयमेवं गुहागतं पुरुषमात्मानम् ॥